Shodhshauryam, International Scientific Refereed Research Journal
© 2020 SHISRRJ | Volume 3 | Issue 5 | ISSN : 2581- 6306

# भारतीयप्राचीनमूल्यविचार:



डा. इक्कुर्ति वेङ्कटेश्वर्लु
सहायकाचार्य:, शिक्षाशास्त्रविभाग:
श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविश्वविद्यालय:
नवदेहली।

**Article Info**
Volume 3, Issue 5
Page Number: 188-195

**Publication Issue :**
September-October-2020

**Article History**
Accepted : 10 Sep 2020
Published : 20 Sep 2020

**सारांश:** – सुवर्णस्य तावद् मूल्यं कथमागतं? कथमिति चेत् तस्मिन् लोहे विद्यामानप्रकाशादि गुणा: ये विद्यन्ते तेषां गुणानां कारणेन तस्य सुवर्णस्य मूल्यमधिकमस्माभि: अनुभूयते। तथैव व्यक्ते: अपि गुणा: मूल्यत्वेन परिणमन्ति। जातिपितु: गान्धिमहात्मन: कीर्ति: कथं विश्वे व्याप्ता चेत् तेषु विद्यमानगुणानां कारणेनैव भवति। अतैवोच्यते सत्यं, अहिंसा, क्षमा, सामाजिकसेवा, शान्ति:, सामाजिकदायित्वानीति गान्धिमहात्मन: मूल्यानि लोके प्रसिध्दानि सन्ति। तथैव हैन्दवानां भगवींता, यवनानां खुरान्, क्रैस्तवानां बैबिल् इत्यादि ग्रन्था: मूल्ययुक्ता: वर्तन्ते। यथा व्यक्तिमूल्यानि तथैव समूहमूल्यानि अर्थात् सामाजिकमूल्यानि अपि जायन्ते।

**मुख्यशब्द:** – मूल्यम्, भारतीय:, प्राचीन:, गुणा:, सामाजिकसेवा, शान्ति:, कीर्ति:, गान्धिमहात्मन:।

**मूल्यस्य अर्थ:** :- मूल्यमिति पदम् आङ्गलभाषायां Value इति उच्यते। Value इति शब्द: लाटिन्भाषाया: Valéry इति शब्दात् निष्पन्नोऽस्ति। यस्य च अर्थ: कस्यचन वस्तुन: मूल्यम्, गुणम्, विशेषतां उपयोगितां वा सूचयति। इदं मूल्यम् एतादृशी एका आचारसंहिता आहोस्वित् सुणानां समूह: भवति। यत् मूल्यमाधारीकृत्य व्यक्ति: व्यक्तित्वविकासं, समाज: समाजविकासं च कर्त्तुं समर्था भवति। मूल्यानि इमानि धर्मप्रचारकै:, आध्यात्मिकप्राचारकै:, शिक्षाशास्त्रिभि:, मानवै:, दार्शनिकै:, राजकीयनायकै:, मनोवैज्ञानिकै:, समाजशास्त्रज्ञै:, चिन्तकै: च सञ्जायन्ते। तथैव प्राचीने भारते ऋषिभि:, महर्षिभि:, मुनिभि:, दार्शनिकै: च विभिन्नमूल्यानि संजातानि, सञ्जायन्ते च।

मूल्यवर्गीकरणम् :-

**Copyright:** © the author(s), publisher and licensee Technoscience Academy. This is an open-access article distributed under the terms of the Creative Commons Attribution Non-Commercial License, which permits unrestricted non-commercial use, distribution, and reproduction in any medium, provided the original work is properly cited

यद्यपि मूल्यविषये मतभेदा: सन्ति। तथापि मूल्यानां १९७९ तमे वर्षे र्ण्र्Rऊ द्वरा प्रकाशिता: मूल्यप्रकारका: ८४ सन्ति। तत्र प्रमुखा: मूल्यप्रकारा: एवं वर्तन्ते। ते यथा –

१.सामाजिकमूल्यानि। २. आर्थिकमूल्यानि। ३. राजनैतिकमूल्यानि।

४. नैतिकमूल्यानि। ५. शास्कृतिकमूल्यानि। ६. आध्यात्मिकमूल्यानि।

७. शैक्षिकमूल्यानि। ८. परम्परागतमूल्यानि। ९. आधुनिकमूल्यानि।

१०. प्राथमिकमूल्यानि। ११. उद्वेगमूल्यानि। १२. मानसिकमूल्यानि।

१३. मानवीयमूल्यानि। १४.वैज्ञानिकमूल्यानि। १५. राष्ट्रियमूल्यानि।

एतेषां समेषां मूल्यानाम् आधारस्तु तद्देशीयवाङ्मय एव भवति। अर्थात् तद्देशीयसाहित्यानुगुणमेव तद्देशीयमूल्यानि उद्भवन्ति। तथैव अस्मद्देशीयमूल्यानि अपि भारतीयसंस्कृतवाङ्मये वर्तन्ते। यथा – वेदोपनिषत्पुराणरामायणभारतभागवतदर्शनादिषु ग्रन्थेषु अस्मद्देशीयपरम्परागतमूल्यानि ससान्दर्भिकम् उल्लिखितानि वर्तन्ते। भारतीयसंस्कृते नैकानि मूल्यानि प्रोक्तानि दृश्यन्ति। तत्रापि राजनैतिकमूल्यानि समाजे सर्वान् शासयन्ति। इमानि राजकीयमूल्यानि समाजे व्यक्तिं, व्यक्तिसमूहञ्च शासयन्ति, अनुशासयन्ति, पालयन्ति, अनुपालयन्ति, नियन्त्रयन्ति दिशन्ति, आदिशन्ति च। भारतीयनवसमाज: चत्वारिमूल्येषु आधारित: वर्तते। यथा समानाता - सोदरभाव: - स्वेच्छा – समन्याय: इति मूल्येषु समाज: जीवति। इदृशान्येव मूल्यानि अपि च उत्कृष्टान्यपि मूल्यानि संस्कृतवाङ्मये उपदिष्टानि आसन्। यद्यपि समाजे नैकानि मूल्यानि सन्ति, तथापि तानि सर्वाण्यपि मूल्यानि राजनैतिकमूल्यानि एव नियन्त्रयन्ति, तत्रापि शिक्षाव्यवस्थां सर्वामपि राजनैतिकमूल्यान्येव उचितानुचितम् उपदिशन्ति प्रभावयन्ति च। परञ्च विद्यालयस्तरे राजनैतिकमूल्यानि अध्यापकै: छात्रा: बोधनीया: भवन्ति। अन्यथा राजनैतिकमूल्यानि समाजे न भवन्ति। केवलं राजकीयमूल्यान्येव दृश्यन्ते। संस्कृतवाङ्मये तु राजनैतिकमूल्यन्येव अवलोकयितुं शक्यन्ते।

भारतीयप्राचीने काले मूल्यशब्दस्य प्रयोग: गुणेति/शीलेति वा शब्दार्थे कृतोऽस्ति। मूल्यमिति पदेन व्यवहार: न स्यात् परन्तु सर्वदा सर्वत्र च मूल्यविचारैव कृत: आसीत्। शब्दोऽयं न मूल्यशब्दस्य पर्याय: अपि तु तत्समवाची शब्द:। उक्तं च यथा –

**शीलेन हि त्रयो लोका: शक्या जेतुं न संशय:।**

**नहि किञ्चिदसाध्यं वै लोके शीलवतां भवेत्।।** (महाभारते)

**सर्वेषामपि सर्वकारणमिदं शीलं परं भूषणम्।** ( नीति. श. १.८३ )

**चन्दनं तगरं वापि उत्पलम् अथ वस्समिकी।**

**एतेसं गन्धजातानं शीलग्रन्धो अनुत्तरो।।** ( धर्मपदम् )

**भारतीयसंस्कृतौ मूल्यानि:-** सुदृढविश्वासः अथवा सुदृढा रीतिः सांस्कृतिकमूल्यमिति उच्चते। मानवजीवनस्य उत्कर्षापादक: धर्मविशेषः संस्कृतिः भवति। उक्तञ्च - **भारतस्य प्रतिष्ठे द्वे संस्कृतं संस्कृतिस्तथा।** तत्तत् समाजे निवसतां जनानां समग्रजीवनविधानस्य प्रवृत्तीनां मूल्यानाञ्च सम्मिश्रितं रूपं संस्कृतिरिति। एवं तत्तत् समाजे निवसन्तः जनाः तदीयां संस्कृतिम् अनुभूय तां संस्कृतिम् आगामि सन्ततिभ्यः परम्परारूपेण सङ्क्रामयन्ति। संस्कृतिः द्विविधा भवति। भौतिकी, भावात्मिका च। दृग्गोचरी संस्कृतिः भौतिकसंस्कृतिः भवति। ऐतिहासिकप्रदेशाः दैनन्दिनजीवने उपयुज्यमानानि उपकरणानि, भौतिकवस्तूनि, सामाजिकाचाराशअच भौतिकसंस्कृतौ अन्तर्भवन्ति। वर्तमानकाले चित्रवस्तुप्रदर्शनशालाः अस्याः संस्कृतेः प्रतीकरूपाः भवन्ति।

भावात्मिका संस्कृतिः दृग्गोचरी न भवति परं अभिज्ञातुं शक्यते। मूल्यानि सामाजिकविश्वासाः, आदर्शाः, इत्यादयः भावात्मिकसंस्कृती अन्तर्भवन्ति।

**भारतीयसंस्कृतौ सामाजिकानि मूल्यानि :-**

आश्रमधर्माः , अतिथिसेवा, पुरुषार्थाः, क्षमा, कर्मसिद्धान्ते विश्वासः, विरागित्वम् , आध्यात्मिकता ,सार्वजनीनभावना , भक्तिभावना, ईषणात्त्रयस्य परित्यागः , शान्तिकामना, ऋणत्रयात् विमोचनम् 7. सर्वभूतहितत्वम्, शिक्षाविषयणी संस्कृतिः , विश्वशान्तिः, सामाजिकी संस्कृतिः, सत्यनिष्ठता, वैवाहिकजीवनव्यवस्थाविषयकल्याणसंस्कृतिः , त्यागनिरतिः, आर्षसंस्कृतिः । इत्यादीनि भारतीयसंस्कृतौ प्रधानवैशिष्ट्यानि भवन्ति।

**भारतीयसंस्कृतौ मूल्यानि बहुधा वर्णितानि**

**आश्रमधर्माः-पुरुषार्थचतुष्टयश्च**

स्ववर्णाश्रमधर्मेण तपसा हरितोष्णात्।

ज्ञानमुत्पद्यते पुंसां वैराग्यादि चतुष्टयम्।।

अहिंसा सत्यमस्तेयं शौचमिन्द्रियनिग्रहः।

एतं सामासिक धर्म चातुर्वर्ण्योऽब्रवीत् मनुः।।

धर्मार्थकाममोक्षाख्येषु चतुर्विधपुरुषार्थेषु मोक्ष एव परमपुरुषार्थः।

धर्मार्थकाममोक्षेषु वैचक्ष्ययं कलासु च।

करोति कीर्तिं प्रीतिञ्च साधुकाव्य निषेवणम्।।

**कर्मसिद्धान्ते विश्वासः**

सञ्चितागामि कर्माणि दह्यन्ते ज्ञानकर्मणा।

यस्य सर्वे समारम्भाः कामसङ्कल्पवर्जिताः।

प्रारब्धानुभवान्मोक्ष इति वेदान्तडिण्डिमः।।

ज्ञानानिदग्धकर्माणां तमाहुः पण्डिचं बुधाः।।

कर्मण्येवाधिकारस्ते मा फलेषु कदाचन।

यथैधांसि समिद्धोग्निः भस्मसात् कुरुतेर्जुन।

मा कर्मफलहेतुर्भूः मा ते सङ्गोऽस्त्वकर्मणि।।

ज्ञानानिस्सर्वकर्माणि भस्मसात् कुरुते तथा।

**आध्यात्मिकता**

यस्त्वात्मरतिरेव स्यात् आत्मतृप्तश्च मानवः।

आत्मन्येव च सन्तुष्टः तस्य कार्य न विद्यते।।

योऽन्तःसुखोऽन्तरारामस्तथान्तर्योतिरेव यः।

स योगी ब्रह्मनिर्वाणं ब्रह्मभूतोऽधिगच्छति।।

**भक्तिभावना**

अनेकजन्मसंसारचिते पापसमुच्चये।

नाक्षीणे जायते पुंसां मार्तण्डाभिमुखी मतिः।।

नाक्षीणे जायते पुंसां मार्तण्डाभिमुखी मतिः।।

**सर्वभूतहितत्वम्**

ॐस्वस्ति प्रजाभ्यः परिपालयन्तां न्यायेन मार्गेण महीं महीशाः।

गोब्राह्मणेभ्यश्शुभमस्तु नित्यं लोकास्समस्तास्सुखिनो भवन्तु ।।

**विश्वशान्तिः**

___ॐ द्यौः शान्तिरन्तरिक्ष शान्तिः, पृथ्वी शान्तिराप: शान्तिरोषधयः शान्तिः। वनस्पतय: शान्तिर्विश्वे देवा: शान्तिर्ब्रह्म शान्तिः, सर्व शान्तिः, शान्तिरेव शान्तिः, सा मा शान्तिरेधि।। ॐ शान्तिः शान्तिः शान्तिः।।

**त्यागनिरतिः**

न कर्मणा न प्रजया धनेन त्यागेनैके अमृतत्वमानशुः। सत्यनिष्ठता

सत्यमेकपदं ब्रह्म सत्ये धर्मः प्रतिष्ठितः ।

सत्यमेवाक्षयाः वेदाः सत्येनैवाप्यते परम् ॥

**अतिथेसेवा**

अरौ अपि उचितं कार्यमातिथ्यं गृहमागते।

छेत्तुमपि आगते छायां न उपसंहरते द्रुमः।।

**विरागित्वम्**

वनेषु दोषाः प्रभवन्ति रागिणां गृहेषु पञ्चेन्द्रियनिग्रहस्तपः ।

अकुत्सिते कर्मणि यः प्रवर्तते निवृत्तरागस्य गृहं तपोवनम् ॥

**विश्वजनीनभावना**

अयं निजः परो वेति गणना लघु चेतसाम्।

उदारचरितानां तु वसुधैव कुटुम्बकम्।।

**ऋणत्रयात् विमोचनम्**

पितृ-ऋणाम्, ऋषि-ऋणम्, देव-ऋणमिति त्रिभिः ऋणवान् जायते। सन्तत्या पितृ-ऋणम्, ब्रह्मचर्येण ऋषि-ऋणम्, यज्ञयागाद्याचरणेन देव-ऋणञ्च अपाकर्तव्यं भवति।

**शिक्षाविषयिकीसंस्कृतिः**

क्षणशः कणशश्चैव विद्यामर्थं च साधयेत्।

क्षणे नष्टे कुतो विद्या कणे नष्टे कुतो धनम् ॥ समावर्तनोपदेशः शिक्षासंस्कृतेः प्रबलोदाहरणं भवति। तद्यथा - सत्यं वद, धर्मं चर, स्वाध्यायात् मा प्रमदः ......।

**सामाजिकी संस्कृतिः**

प्रत्यहं प्रत्यवेक्षेत नरश्चरितमात्मनः।

किन्नु में पशुभिस्तुल्यं किन्तु सत्पुरुषैरिव।।

**क्षमा**

क्षमा शस्त्रं करे यस्य दुर्जनः किं करिष्यति । अतृणे पतितो वह्निः स्वयमेवोपशाम्यति ॥

**राजनैतिकमूल्यानि** :-

प्राचीनकाले राजनीतिशास्त्रस्य विभिन्नानि नामानि आसन्। यथा राजशास्त्रम्, राजर्धः, दण्डनीतिः, नीतिशास्त्रम्, अर्थशास्त्रमिति नामान्तराणि संस्कृतसाहित्ये विद्यन्ते। (मनु.६.२, महा. ६२. २९) राजनीतिशास्त्रस्य एकं सुप्रसिध्दनाम भवति नीतिशास्त्रमिति अत्र का नाम नीति इत्युक्तौ नीयते व्यवस्थाप्यते स्वेषु सदाचारेषु लोकाः यया स नीतिः अर्थात् प्रजान् सदाचारेषु यया आनीयते सा एव नीतिरित्युच्यते। अत एवोच्यते नयनाद् नीतिरित्युच्यते ( शुक्रनीतिः.१.१५७) अस्मिन् नीतिशास्त्रे उक्ताः गुणाः एव राजनीत्यां स्वीकृताः आसन् । ते एव गुणाः राजनैतिकमूल्यनि इति अस्माभि स्वीकर्तुं शक्यन्ते तेषु कतिचन मूल्यानि आधुनिकसमाजेऽपि दृश्यन्ते। तानि यथा-राज्ये संघटनभावः :- उत्तमसमाजस्य निर्माणं कतिचन मूल्यानामुपरि आधारितं भवतीति। यथा- ब्रह्मणे ब्रह्मणम्, क्षत्राय राजन्यम्, मरुद्भ्यो वैश्यम्, तपसे शूद्रम्। (यजु. ३०.५) अर्थात् अत्र अयमर्थः स्वीकर्तव्यः यत् ब्रह्मण-क्षत्रिय-वैश्य-शूद्रादयः कर्मानुगुणं विभक्ताः चेतदपि सर्वे मिलित्वैव राज्याङ्गं भवति। अतः संघटनमिति मूल्यमस्माभिः स्वीकर्तव्यं भवति।

**आदर्शराज्यस्य लक्षणानि** :- प्राचीनकाले आदर्शराज्यनिर्माणाय मूल्यानि कतिपयोक्तानि तान्यथा - लोकं पृण, छिद्रं पृण। (यजु. १५.५९) राज्यपालकाय वेदः निर्दिशति, यत् राज्ञा लोकहितमेवं जनहितबाधकानि च दूरीकरणीयानीति। एवं महाभारते, शुक्रनीतौ चोच्यते

**प्रत्यक्षं सुखभूयिष्ठम्,आत्मसाक्षिकमच्छलम्।**

**सर्वलोकहितं धर्मं, क्षत्रियेषु प्रतिष्ठितम्।।** (शान्ति. ६४. ५)

**सर्वोपजीवकं लोकस्थितिकृद् नीतिशास्त्रकम्।**

**धर्मार्थकाममूलं हि स्मृतं मोक्षप्रदं यतः।।** (शुक्र. १.५ )

अत्र राज्यस्थ प्रजानां शान्तिः, कपटराहितयं, लोकहितं, धर्मार्थकाममोक्षाः, राज्यस्य सुरक्षा च आदर्शराज्ये भवितव्यानीति राजनीतिशास्त्रं वदति।

**वृत्तिसम्बन्धमूल्यानि :-**

प्राचीने काले मनु-महाभारत-गीतादि ग्रन्थेषु कर्मानुगुणं गुणानुगुणं च वृत्तिः निर्दिष्टा वर्तते। यदि तस्यां वृत्तौ निदिष्टगुणाः न भवन्ति तर्हि ते शूद्राः भवन्तीति र्सुणाः भवेयुः, नतु दुर्गुणाः इति च। ते यथा –

**ब्रह्मणक्षत्रियविशां, शूद्राणां च परन्तप।**

**कर्माणि प्रभविभक्तानि, स्वभावप्रभवैर्गुणै।।** (गीता. १८. ४१)

**तस्माद् धर्मो विहितो ब्रह्मणस्य दमः शौचमार्जवं चापि राजन्।**

**ऋजुर्मृदुरनृशंसः क्षमावान, स वै विप्रो नेतरः पापकर्मा।।** (शान्ति. ६३.७/७)

**शूद्रो राजन् भवति ब्रह्मबन्धुः, दुश्चारित्रो यश्च धर्मादपेतः।**

**निर्मर्यादे चाशुचौ क्रूरवृत्तौ हिंसात्मके त्यक्तधर्मस्ववृत्ते ।।** (शान्ति. ६३.४/६)

इत्थं वृत्तिसम्बन्धानिमूल्यानि संस्कृते उल्लिखितानि वर्तन्ते।

**राज्याङ्गानि :-** भारते प्राचीनकालदेव सुराज्याङ्गव्यवस्था आसीदिति ज्ञायते यत्

**स्वाम्यमात्य-सुहृत्-कोश-राष्ट्र-दुर्ग-बलानि च।**

**सप्ताङ्गमुच्यते राज्यं, तत्र मूर्धा नृपः स्मृतः।।**

**दृगमात्यः सुहृच्छ्रोत्रं, मुखं बलं मनः।**

**स्तौ पादौ दुर्गराष्ट्रौ, राज्याङ्गानि स्मृतानि हि।।** (शुक्र .१.६१, ६२)

अत्र राज्ञे शरीरे यथा अवयवाः प्रधानाः तथैव राज्ये अङ्गानि अपि अत्यन्तमूल्यानीति प्रत्यपादि। परञ्च इदानीं पालकेषु ईदृशानि मूल्यानि नैव दृश्यते।

**राज्ञः गुणाः,कर्तव्यानि च** :- राजा नाम अधुना राष्ट्रपतिः भवति। प्राचीने काले राष्ट्रपतेः कीयत्प्राधान्यमासीत् तावद् अद्यत्वे नैव अवलोक्यते यथा –

**यदि न स्याद् नरपतिः, सम्यङ् नेता ततः प्रजाः।**

**अकर्णधारा जलधौ, विप्लवेतेह नौरिव।।** (शुक्र. १.६५ )

**राजा प्रजानां प्रथमं शरीरं, प्रजाश्च राजोऽप्रतिमं शरीरम्।**

**राज्ञा विहीना न भवन्ति देशा, देशैविहीना न नृपा भवन्ति।** (माहा. शान्ति. ६८.५९)

अत्र राज्ञा विना राज्यसुभिक्षं न भवति, राज्ञः अभावे राज्यं प्रजानाम् अभावे राज्यं नैव भवतीति राज्ञे महत् प्राधान्यं दत्तमासीत्।

**राज्ञः गुणाः** :- महाभारते ,शुक्रनीतौ च राज्ञः गुणाः अत्यन्तं मूल्ययुक्तानि आसन्। कश्चन प्रापरिपालकः कथं स्यात्। प्रशासनदक्षता कीदृशी स्यात् इति संस्कृते स्पष्टनिरूपितमासीत्। यथा –

**पिता माता गुरुर्भ्रता, बन्धुर्वैश्रवणोः यमः।**

**नित्यं सप्तगुणैरेषां, यक्तो राजा न चान्यथा।।** (शुक्र. १.७७)

**माता पिता गुरुर्गोप्ता, वह्निवैश्रवणो यमः।**

**सप्त राज्ञो गुणानेतान्, मनुराह प्रजापतिः।।** (महा.शान्ति.१३९.१०३ )

**नहीदृशं संवननं, त्रिषु लोकेषु विद्यते।**

**दया मैत्री च भूतेषु, दानं च मधुरा चवाक्।।** (शुक्र. १. १७१)

इत्थमत्र बहुगुणसम्पन्न: राजा नित्यं प्राजासु ऐक्यं भवेदिति प्रचीनकाले राज्ञे निर्देशा: आसन्। इमे सर्वेऽपि तदानीतन राज्ञ: मूल्यान्येव आसन्निति नास्ति सन्देह:।

**राज्ञ: कर्तव्यानि** : - शूक्रनीतौ राज्ञ: कर्तव्यानि सुपरिपालनाय, दुष्टदण्डनाय, शिष्टसंरक्षणाय, राज्ञा किं कर्तव्यानि इत्थं निर्दिष्टानि सन्ति। यथा –

**दुष्टनिग्रहणं दानं, प्रजाया: परिपालनम्।**
**यजनं राजसूयादे:, कोशानां न्यायतोऽर्जनम्।।**
**करदीकरणं राज्ञा, रिपूणां परिमर्दनम्।**
**भूमेरुपार्जनं भूयो, राजवृत्तं तु चाष्टधा।।** ( शुक्र .१.१२३.१२३४ )

अत्र राज्ञ: कर्तव्यानि सुस्पष्टानि उट्टङ्कितानि इमान्येव कर्तव्यानि मूल्यत्वेन परिणम्य लोके अधुनापि अस्माभि: अनुभूयते एव।

**उपसंहार:** - भारतीयसमाज: ऋषीणां ,महर्षिणां मुनीनां, कविनां परम्परात्मक: वर्तते। एतेषां कारणेनैव भारतीयसनातनधर्म: परिदृश्यते। तथेव संस्कृतवाङ्मये नैके विषया: प्रोक्ता:, तत्र सामाजिक-राजनैतिक-शैक्षिक-आर्थिक-आध्यात्मिक-वैज्ञानिक-शास्त्रीयविषया: तत्तत् सन्दर्भानुगुणं उल्लिखिता: वर्तन्ते। एते विषया: कालानुक्रमेण मूल्यरूपेण परिणम्य समाजे सम्मिलिता: वर्तन्ते। अत्र राजनैतिकमूल्यानि समाजमत्यन्तं प्रभावयन्ति। नैकानिमूल्यानि सस्त्वपि राजनैतिकमूल्यानि प्राचीने आधुनिके च अन्यानि मूल्यानि प्रभावयन्ति। संस्कृतवाङ्मये नैकानि राजनैतिकमूल्यानि वर्तन्ते। राज्ञ: गुणा:-कर्तव्यानि, राजधर्मा:, राज्याङ्गानि, संविधानम्, प्रशासनविधानम्, दण्डनीति:, वृत्तिधर्मा:, शिक्षावषियकराजधर्मा: इतीमे विषया: मूल्यरूपेण अस्माभि: स्वीकर्तुं शक्यन्ते। वस्तुत: गुणा: एव मूल्यानि भवन्ति। अत: संस्कृतवाङ्मये राजनैतिकमूल्यानि अधुनिकराजकीयमूल्यै सह छात्रेभ्य: बोधनीया: भवन्ति। इति मे मति:।

**सन्दर्भग्रन्थसूची** :-


1. वेदों में राजनीतिशास्त्र –डा. कपिलदेव द्विवेदी –विश्वभारती अनुसन्धान परिषद् -ज्ञानपुर।
2. .वेदों में समाजशास्त्र,अर्थशास्त्र,शिक्षाशास्त्र – डा.कपिलदेव द्विवेदी-विश्वभारती अनुसन्धान परिषद् - ज्ञानपूर।
3. वर्थमानभारतदेशमुलो विद्या –तेलुगु अकाडमी- अन्ध्रप्रदेश:- हैदराबाद् -२००१३।
4. कौटिल्यमर्थशास्त्रम् - पुल्लेल श्रीरामचन्द्रुडु, श्रीजयलक्ष्मी पब्लिकेशन्स्,हैदराबाद्।
5. भारतीय संस्कृति - डा.प्रीति प्रभा गोयल, राजस्थानी ग्रन्थागार, जोधपुर्।
6. वैदिकशिक्षापद्धति: - डा.भाष्यकरमिश्र:, महर्षिसान्दीपनि राष्ट्रियवेदविद्याप्रतिष्ठानम्, उज्ययिनि, २००३।